# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANACOR11T-SANSKRIT (CC11)

Time Allotted: 2 Hours　　　　　　　　　　　　　　　　　　　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्

क-विभागः

1. अधो लिखितेषु प्रश्नेषु यथेच्छं प्रश्नद्वयं समाधेयम्। 10×2 = 20

(क) अग्निसूक्तस्य ऋषिच्छन्दोदैवतानि समुल्लिख्य अग्निदेवतायाः स्वरूपं यथाधीतं लिखत। 1+1+1+7

(ख) हिरण्यगर्भसूक्तस्य क ऋषिः ? का च देवता ? सूक्तस्यास्य प्रतिपाद्यं तत्त्वं समासेन विवृणुत। 1+1+8

(ग) भूमिसूक्तं कस्मिन् वेदे वर्तते ? अस्य सूक्तस्य क ऋषिः ? सूक्तेऽस्मिन् प्रतिपादितं भूमिमाहात्म्यं समासेन लिखत। 1+1+8

(घ) शिवसङ्कल्पसूक्तस्य क ऋषिः ? का च देवता ? सूक्तेऽस्मिन् मनसः स्तुतिः यथा विहिता तथा उपस्थाप्यताम्। 1+1+8

2. अधः प्रदत्तेषु मन्त्रेषु ऋषिच्छन्दोदैवतविनियोगनिर्देशपुरःसरं यथेच्छं मन्त्रद्वयं व्याख्येयम्। 5×2 = 10

(क) अग्नि पूर्वेभिर्ऋषिभि-

रीड्यो नूतनैरुत।

स देवाँ एह वक्षति॥

(ख) यस्येमे हिमवन्तो महित्वा

यस्य समुद्रं रसया सहाहुः।

यस्येमाः प्रदिशो यस्य बाहू

कस्मै देवाय हविषा विधेम॥

(ग) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

(घ) यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

3. अधो लिखितेषु मन्त्रेषु यथेच्छम् एकस्य मन्त्रस्य पदपाठः विधेयः। 5×1 = 5

(क) अग्निमीले पुरोहितं
यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥

(ख) हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥

अथवा

अधो लिखितेषु विनियोगवाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(ग) 'अग्निमीले' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(घ) अग्नीषोमप्रणयन 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

ख-विभागः

4. अधः प्रदत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पनीं लिखत। 5×1 = 5

(क) लेट्लकारः।

(ख) वैदिकतुमुन्प्रत्ययः।

(ग) पदपाठः।

5. अधो लिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) वैदिकस्वरः कतिविधः ? के च ते ?

(ख) पदपाठः केन विरचितः ? विकृतिपाठः कतिविधः ?

(ग) पदपाठे इति-प्रयोगस्य सोदाहरणमेकं नियमं लिखत।

(घ) 'स जनास इन्द्रः'– इत्यत्र 'जनासः' इति पदं कथं जायते ? किं च सूत्रम् ?

(ङ) 'विश्वा च्यवना कृतानि'- इत्यत्र 'विश्वा', 'च्यवना' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

(च) वैदिकवाङ्मये प्रयुक्तस्य लेट्लकारस्य उदाहरणद्वयं लिखत।

(छ) 'गमध्यै', 'दृष्ट्वाय' चेति द्वयोः वैदिकपदयोः लौकिकं रूपं लिखत।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——